2. ऊर्मिशब्दो बुभुक्षदिषु षट्सु यथा — "बुभुक्षा च पिपासा च प्राणस्य, मनसः स्मृतौ। शोकमोहौ, शरीरस्य जरामृत्यू षड्मयः।। See 6.68, 71.
3. The time of flowing of Prāṇavāyu upto the measurement of two and quarter finger is called the 'Tuti'. See *Tantrasāra,* Abhinava Gupta, p. 48
4. See *Bhagavadgītā,* 2.20.

***

द्वाविंशः पटलः

भक्तिमाहात्म्यप्रतिपादनम्

ईश्वर उवाच

सांख्ययोगापेक्षया भक्तेर्गरीयस्त्वम्

न साधयति मां योगः सांख्य[1]धर्मस्त्वनुष्ठितः ।
स्वाध्यायोऽपि तपस्तीर्थ[2] क्षेत्राणि नियमादयः ।।१।।

व्रतानि यज्ञाश्छन्दांसि जातयश्चाश्रमा अपि ।
विना भक्त्या सुदृढया मय्येव निरपेक्षया ।।२।।

सदाचाररतं धीरं सदयं धर्मतत्परम् ।
मनस्विनं वा विद्वांसमपि नो रक्षयेत् प्रिये ।।३।।

ज्ञानं ध्यानं च शुश्रूषा यत्नः सर्वोऽपि साधितः ।
यदि मद्भक्तिरहितं न पुनात्यपि वा क्वचित् ।।४।।

Chapter - 22

GLORY OF DEVOTION

God preaches —

Devotion is Higher than Sāṅkhya-yoga

Only by performing Yoga, Sāṅkhya, rites and rituals as prescribed, self-study, penance, visiting pilgrimage, residing in religious monastery and observing the religious injunctions one can never attain me (1). Further, observance of vows, performance of sacrifice, chanting vedic hymns, being born in a particular caste and adhering to the rules of Āśramas (Brahmacarya, Gārhastha, Vānaprastha and Sanyās) also are not sufficient to enable one to attain Me, the Absolute, without intense devotion (2). O dear ! observing righteous conducts, perseverence, compassion, religious disposition are also not able to protect the wise and learned person (without devotion) (3). Knowledge, meditation, service and other endeavours are also not able to purify one,

अनाचारोऽपि साचारो वृत्तिः शुद्धापि वा न वा ।
सुजनो दुर्जनो वापि मद्भक्त्या पदमुत्तरेत् ।।५।।

निरपेक्षो भक्तः सर्वोत्तमः

भक्तः सर्वोत्तमो देवि निरपेक्षो ह्यकिञ्चनः ।
अप्युत्कटेभ्यः कर्मभ्यो महदादिभ्य एव च ।।६।।

यथा नदीषु मन्दाकिन्यमरेषु शचीपतिः ।
भवती गिरिजा स्त्रीषु पुरुषेष्वहमीश्वरः ।।७।।

सर्वासां मद्विभूतीनां भक्त एव तथा वरः ।
न बिभेमि कुतश्चापि यथा भक्तादहं प्रिये ।।८।।

भक्तिमहिमा

अतिप्राणिविहिंस्रं वा ह्यतिपातककारिणम् ।
अतिनिन्दितकर्माणं मम भक्तिः पुनाति हि ।।९।।

---

if devoid of devotion (4). Persons possessing bad conducts or good conducts, pure dispositions or impure dispositions, estimable or wretched are able to go beyond the cycle of the world only by devotion (5).

Unconditional Devotion is Supreme

O Goddess ! one who is immersed in the self-less unconditional devotion is superior to the person who is engaged in rigorous penance, performs rites and rituals and the seekers of the knowledge of Prakṛti and Puruṣa (6). As the river Mandākinī is the purest among the rivers, Indra is superior to all divinities, yourself is supreme among all women and myself is supreme among all men (7) ; O dear ! so my devotee is the supreme among all of my manifestations and I am not scared of any thing except my devotees (8).

Glory of Devotion

My devotion sanctifies even the heinous murderer of many beings, despicable sinner and also the doer of wretched deeds (9). O the

भक्त्या देव्यनपायिन्या निरघे मय्यमायया ।
प्रीतिमय्या भवाम्भोधिं को वा नावा न सन्तरेत् ।।१०।।

भक्तिर्माता पिता वित्तं बन्धुरापदि[३] सोदरः ।
गुरुर्मित्रं सुहृद् भोगो[४] मोक्षश्च पुरुषार्थराट् ।।११।।

पत्रं पुष्पं फलं वन्यं ग्राम्यं वा दुर्बलोचितम् ।
समर्पितं समानीय भक्तेन मम तत्प्रियम् ।।१२।।

सुगन्धि वाप्यगन्धं वा तुलसीकुसुमादिकम् ।
समर्पितं भवेत् तृप्त्यै भक्तानां[५] काङ्क्षितेन मे ।।१३।।

भक्तः सर्वाधिकः प्रियः

मत्तस्त्वत्तोऽपि कैलासान्नन्दीशाच्च गजाननात् ।
स्कन्दादिकात् ततश्चापि भक्त एव प्रियो मम ।।१४।।

अकिञ्चनस्य दान्तस्य शान्तस्य समचेतसः ।
सर्वभूतात्मभूतस्य निरपेक्षं मदात्मनः ।।१५।।

---

unblemished Goddess ! who will not be able to cross the ocean of the world with the help of the boat of unconditional devotion, an intense love for me (10) ? Devotion is like mother, father, wealth, friend, brother, preceptor (Guru), fellow, wellwisher and a source of enjoyment. It is also the bestower of four Puruṣārthas along with liberation (11). The devotee who reverently and devotedly offers me the leaves, flowers, fruits easily available in villages and forests to even unprivileged person is very dear to me (12). Sweet odoured or without odour or whatever is available like Tulasī, flower etc. if surrendered to me, I am fully satisfied because I only see the intention of the devotee (13).

Devotee is Dearest to Me

Devotee is dearer to me than my own self, than yourself and also dearer than Kailāśa, Nandī, Gaṇeśa and Skanda etc. (14). Devotee is dearest to me because he is humble, self controlled, tranquilled,

निस्तरङ्गमहानन्दपारगाः शैवसत्तमाः ।
नांशांशमपि जानन्ति कामितस्य मम प्रिये ।।१६।।

भक्त्या समर्पितमक्षय्यं भवति

सुगन्धि शीतलं स्वच्छं [६]वस्त्रपूतं पयो बहु ।
चुलुकं वा यथाशक्ति तदक्षय्यं मदर्पितम् ।।१७।।

करवीरैर्विल्वपत्रैर्दूर्वाभिस्तुलसीदलैः ।
द्रोणैर्मामर्चयेन्नित्यं पञ्चभिः कुसुमैः शिवे ।।१८।।

अशक्तस्तु यथाशक्ति स्तोत्रपूजाजपादिकम् ।
स्मरणं कीर्तनं ध्यानं नर्तनं चाप्यमायया ।।१९।।

कर्मणा मनसा वाचा सर्वाशक्तस्य सुन्दरि ।
नामानुस्मरणं चैव लभ्यं तच्च ममाप्तये ।।२०।।

तत्राप्यशक्तो यो नित्यं यदश्नाति पिबत्यपि ।
मम तीर्थप्रसादात्मा मद्युक्तो मामुपैष्यति ।।२१।।

---

perceiver of equality in all beings, beholder of his own self in all, does not expect anything from any one. Such devotee is my own self (15). O my dear ! the supreme devotees remain ever immersed in the calm ocean of bliss and do not possess even an iota of desire (16).

Devotion Bestows Inexhaustible Results

Devotee who offers me a handful of water — scented, cold, pure and duly filtered by fine cloth, receives inexhaustible results (17). O Śive ! devotee should worship me regularly with the five i.e. Karavīr flower, Bilva leaves, Dūrvā, Tulasi leaves and Droṇa flower (18). If the devotee is unable of offer the above flowers, he should recite the prayers, perform worships, chant hymns, should constantly remember me, sing my glory, practice meditation on me and devotedly dance in joy for me to the best of his capacity (19). O the Graceful ! the devotee who is unable to perform anything narrated above, should constantly remember me by his thought, speech and action. Then only he can attain me (20). If a devotee is not able to perform even this, then he should

सद्भक्तिः परमो लाभः

अनुष्ठाना[७]समर्थस्य शक्तस्य तनुदण्डने ।
सद्भवक्तिः परमो लाभो दरिद्रस्य निधिर्यथा ।।२२।।

औषधं भवरोगस्य पापदावानलाम्बुदः ।
[८]मद्भक्तिर्दुःखभोक्तृणां[९] भवसन्तप्तचेतसाम् ।।२३।।

कृतानि यानि धीपूर्वमत्युग्राणि च कोटिशः ।
मद्भक्तिवडवाग्नौ तु तृणायन्ते न संशयः ।।२४।।

मोहान्धतमसे घोरे दुःखवैभवकानने ।
संविधानसमाविष्टः सन्मार्गो भक्तिरेव मे ।।२५।।

आलस्येनापि कार्येण परिहासेन[१०] मायया ।
मद्भक्तः सन्तरेद् दुःखं व्याजेनाप्यखिलात्मना ।।२६।।

सुखेच्छुरभ्यसेद् भक्तिं रोगीवौषधमादरात् ।
ममानेपेक्षामव्यग्रः पाथेयमिव मार्गगः ।।२७।।

---

regularly eat and drink considering it my offering (prasāda). Such person also attains me (21).

Devotion is the Supreme Attainment

For the devotee who is able to perform my worship and has control over his senses, the true devotion is the highest attainment as the wealth is for the poor (22). Devotion to me is the panacea for all the miseries of the world, as the rain is for the horrible fire of sin. My devotion fully redeems the sufferers from the pangs of the world (23). Millions of abominable sins voluntarily committed by human beings are burnt by the huge fire of devotion like a straw, there is no doubt about it (24). Devotion is the only prescribed true means for the person who is painfully wandering in the forest of sufferings being engulfed in the intense darkness of delusion (25). Even if my devotee observes devotion inattentively, by giving excuses or in humour, by pretention, also crosses the ocean of miseries (26). Devotee who desires happiness should observe the devotion as the diseased person demands remedy. Traveller carries food for the journey, so devotee should take refuge in devotion unconditionally without being perturbed (27). Devotee should

भक्तो भक्त्या भजेन्मां वै निःसङ्गमतिमाश्रितः ।
विज्ञायाखिलवर्णानां योषाचारमिव प्रियम् ।।२८।।

स्त्रीपुमानपुमानीशा भक्तिमेवाश्रयन्तु मे ।
[११]नरके वाधिकारोऽस्ति ऋते मद्भक्तिमुत्तमाम् ।।२९।।

बहुनात्र किमुक्तेन वक्तव्यं ग्रन्थकोटिभिः ।
वक्ष्ये शृण्वेकवाक्येन मद्भक्तिः परमा गतिः ।।३०।।

देव्युवाच

[१२]धीर्न ते नटना लोके चतुरं ते प्रवर्तनम् ।
धीमयं धीगतिं देव[१३] धीमहीशानमीश्वरम् ।।३१।।

देवदेवोत्तम स्वामिन् दीप्यद्द्वादशकोटये ।
शशिकोटिसुशीताय त्वत्तेजःखनये नमः ।।३२।।

वदात्र परमेशान भक्तिलक्षणमीश्वर ।
यया ज्ञातभवद्रूपः परामेष्यति निर्वृतिम् ।।३३।।

---

devoutedly surrender singlemindedly and taking final refuge in me. I am dearest to him in the world as a beautiful woman is to a sensuous man (28). Woman, man or any other being should take refuge only in my devotion because no one is eligible for the supreme righteousness without intense devotion to me (29). Now, what else remains to be said? What has been stated in innumerable scriptures may be cited in one sentence, 'my devotion is the ultimate goal' (30).

Goddess enquires —

O God ! the drama of this world is the product of your intelligence and its sustenance is due to your acumen. I pay my obeisance to you as the epitome of supreme intelligence, prime mover, the Lord of lords and understanding (31). You are the supreme among all divinities, my lord, your luminosity is brighter than the light of the twelve crores of suns and more soothing than the millions of moons. I bow unto you as the abode of all lustre (32). O the supreme lord ! kindly preach me the nature of devotion by knowing which one attains your nature and is finally redeemed (33).

ईश्वर उवाच

भक्तिलक्षणनिरूपणम्

कर्मणा मनसा वाचा जाग्रत्स्वप्नसुषुप्तिषु ।
मदनुस्मरणं ध्यानं स्तुतिः पूजा रतिः सदा ।।३४।।

मल्लिङ्गधारणं भक्तपूजनं लिङ्गपूजनम्[१४] ।
अहिंसा सर्वभूतेषु दया मदनुवीक्षणम् ।।३५।।

मल्लिङ्गलिङ्गचिह्नानां दर्शने मयि भक्तितः ।
अमायया ऽनपेक्षातः साष्टाङ्गमभिवादनम् ।।३६।।

गतिं प्रदक्षिणं सर्वां मम सर्वत्र सर्वदा ।
भावयेच्छयनं सुभ्रु प्रमाणं मयि सर्वशः ।।३७।।

उच्चारणं चाक्षराणां मन्नामस्मरणं त्विति ।
भुक्तपीतादिकं सर्वं मत्प्रसादधियाश्नुते ।।३८।।

सर्वामैन्द्रियकीं वृत्तिं मत्सेवायै नियोजयेत् ।
सम्प्राप्तमखिलं भोगं मदर्थमिति चार्पयेत् ।।३९।।

God replies —

Nature of Devotion

Remaining engrossed in constant remembrance, meditation, prayer, worship and intense love of Śiva with action, thought and speech in all the states of waking, dreaming and deep sleep (34) ; wearing Iṣṭaliṅga, worshipping devotees and Liṅgas, observance of non-violence for all beings, having compassion for all, perceiving me in everyone (35) ; considering the objects scribed with the symbol of liṅga as the holy vision of Śiva himself, prostrating humbly before me without any pretention and expectation (36), O gracious ! taking round of everything considering me omnipresent in all and always visualising me while sleeping and paying obeisance to me (37) ; always reciting the letters of my name, ever remembering my name, accepting all the eatables and drinks as my offering (Prasāda) (38) ; engaging all the senses in my service and offering all the objects of enjoyment as the offering for me (39) ; not feeling perturbed even in the state of

कृच्छ्रेऽपि मनसि क्लेशं न सम्प्राप्तमनुस्मरेत् ।
अतिमानुषसम्पत्तावप्युपसर्पेत न क्वचित् ।।४०।।

पुत्रदारधनादीनां सङ्गमः पान्थसङ्गमः ।
अनुदेहं नियन्त्येते स्वप्नो निद्रानुगो यथा ।।४१।।

नेहामुत्र फलं किञ्चिदिच्छेद् भक्तो मम प्रिये ।
अपि कैवल्यमीशानि मया दत्तमपि क्वचित् ।।४२।।

कियती सार्वभौमादिसम्पत्तिश्चाणिमादिका ।
तृणीकृताणिमाद्यष्टसिद्धेर्वै भक्तिरंहसा[१५] ।।४३।।

दृष्टं श्रुतमनुध्यातं यद् बुद्ध्या वा कुलेश्वरि ।
सर्वं मदात्मना[१६] पश्येद् [१७]योषाचारमिव प्रियम् ।।४४।।

दरिद्रस्य [१८]धनप्राप्तौ यथा स्यात् तन्मतिः शिवे ।
कामुकस्य यथा काम उभे [१९]तत्प्रीतिलक्षणे ।।४५।।

---

unbearable suffering and not being concerned with the enormous acquisition of wealth usually received by privileged person (40) ; considering son, wife, wealth etc. highly temporary like the fellow travellors of the journey ; they are impermanently associated, with the body as the dreams are with the sleeps (41) ; O Goddess ! my devotee does not aspire for the results in this world and the world beyond. O dear ! he even is not desirous to accept the liberation offered by me (42). For such devotee of mine, there is no value for extensive and enormous wealth and the spiritual achievements like aṇimā etc., as he considers eightfold spiritual achievements (aṇimā etc.) insignificant like the blade of grass because of the passion of intense devotion for me (43). O the Goddess of the universe ! whatever my devotee perceives, listens to and ponders over with his understanding, always and everywhere should experience me and feel pleasure as if he is in company with a beautiful belle (44). O Śive ! as the poor, after receiving wealth and the sensuous person after satisfaction of the senses, feels happy and satisfied, in the same way, the devotee, in love with God, experiences

कार्या पदार्थसम्प्रीतिर्भक्तेर्मोहमयी मतिः ।
मय्यकामेन सा शुद्धा भक्तिर्वै सात्त्विकी मतिः ।।४६।।

भक्तिदन्तिनमारुह्य भवश्वभ्यः कदाचनः ।
न बिभेति क्वचिद्धीमान् भक्तिमान् मयि निस्पृहः ।।४७।।

जात्यन्धस्य यथा दृष्टिर्दरिद्रस्य यथा निधिः ।
मूकस्य वचनं रोगपीडितस्य[२०] यथौषधम् ।।४८।।

प्राणस्य जीवनजलमधीरस्य स्वतन्त्रता ।
तथा दुःखतितीर्षोर्मे भक्तिलाभः परः शिवे ।।४९।।

व्यवहारस्त्रिरूपोऽपि मयि भक्तिमतः सुखम् ।
अभक्तस्य परं दुःखमेष सर्वत्र निश्चयः ।।५०।।

देव्युवाच

इदं सत्तनवे तुभ्यं महदाधाररूपिणे ।
नमोऽस्तु[२१] जयरूपाय शम्भवे चेतनात्मने ।।५१।।

---

the same intense blissful state (45). If the devotion is for the fulfilment of any purpose, it is considered as vitiated with attachment to the object. On the other hand, the pure devotion for attaining me and which is devoid of any other desire is called as 'Sāttvikī' temperament (46). The wise desireless devotee of mine riding on the elephant of devotion is not scared of the dog of the miseries of the world (47). O Śive ! as the vision is for the born-blind, wealth for the poor, speech for the dumb, panacea for the diseased, life for the dying, freedom for scared and fettered, so also, the devotion is the supreme means for getting redemption from all kinds of miseries (48-49). My devotee remains happy in all the three stages (Pāramārthika, Vyavahārika and Prātibhāsika), on the contrary, a non devotee experiences great miseries in all the above phases, it is a certainty everywhere (50).

Goddess enquires —

O Śambhu, the substratum of the Mahat etc. conferrer of victory, of the nature of consciousness, I bow unto you (51).

भक्तिः कथमुत्पद्यते

सन्तरेदापदं भक्त्या निरूपितमिति प्रभो ।
कथमुत्पद्यते सास्य यामाश्रित्य[२२] भवत्प्रियः ।।५२।।

ईश्वर उवाच

अपेक्ष्य कामिनीं कामी कुर्यात् कामपदां[२३] कृतिम् ।
[२४]ता एवान्तवतीर्भुक्त्वा तदन्ते दुःखभाग् भवेत् ।।५३।।

भक्तिलाभाय गुरुशुश्रूषणमपेक्षितम्

पुरा कृतेन पुण्येन निर्विण्णः सुखसङ्गमे ।
गुरुं समाश्रयेद् भक्त्या दुःखोत्तरणहेतवे ।।५४।।

प्राणार्थमानवसुभिरादरार्थमनुक्रमैः ।
उपासयित्वा सन्तोष्य जानीयान्मामशेषतः ।।५५।।

प्रसाद्य सेवया भक्तो[२५] गुरुं शुश्रूषया प्रिये ।
त्यक्त्वैषणामसम्यग्ज्ञः श्रयेद्भक्तिं परां मयि[२६] ।।५६।।

Origin of Devotion

O Lord ! you have taught me that one crosses the ocean of miseries with the help of devotion. Now, kindly let me know its origin, by taking refuge of which, the devotee becomes dear to you (52).

God replies —

The lascivious person indulges himself in various sexual activities after meeting his desired mate but becomes unhappy and miserable at the end due to excessive enjoyment (53).

Service to Guru Essential for Devotion

Devotee becomes desireless owing to the fructification of the good deeds performed in the previous lives. He should devotedly take refuge in Guru for the cessation of miseries (54). Disciple should gradually surrender his life, property, honour and wealth to his Guru and make him satisfied with his service and acquire perfect knowledge from him regarding me (55). O dear ! he should please Guru by his service. He should get rid off all worldly desires and should take refuge

अशक्तः कामनात्यागे न [२७]ग्रहीतुमपीच्छति ।
मध्यस्थः श्रीगुरुमुखाज्ज्ञात्वा मामेव संश्रयेत् ।।५७।।

भक्त्या तु दृढया मां च ज्ञात्वा सम्यक् समः शिवे ।
शिवोऽहमिति सम्भाव्य शिव एव भवेद् ध्रुवम् ।।५८।।

तद्यावज्ज्ञायते भक्तिर्जानीयान्मामशेषतः ।
गुरुं परिचरेत् तावन्नीचवृत्त्यापि दासवत् ।।५९।।

तदुक्तः परमो मन्त्रः क्रिया तच्चोदिता परा ।
करणत्रयभावेन विश्वसेद् गुरुमीश्वरम्[२८] ।।६०।।

भक्त्यभ्यासाज्ज्ञानयोगयोः समुत्पत्तिः

भक्त्यभ्यासात् समुत्पन्नं ज्ञानं च सुदृढं भवेत् ।
ज्ञानेन योगमाप्नोति ताभ्यां सिद्धो विमुच्यते ।।६१।।

अभक्तस्योदिता संविद् दुर्लभानर्थकारिणी ।
तुषापघातिन इव विशेषस्तस्य वै क्रमः ।।६२।।

---

in my supreme devotion for the attainment of the perfect knowledge (56). The devotee who is unable to relinquish his desires and at the same time unwilling to retain them, such an indweller of the middle path, should acquire knowledge from the mouth of divine Guru taking refuge in me (57). O Śive ! the devotee by being firmly established in my devotion, by attaining the perfect knowledge, having equanimity in perception and by conceiving himself as Śiva, ultimately becomes Śiva Himself (58). Devotee should serve his Guru devoutedly like a low-born slave till he attains a perfect knowledge of me and my devotion (59). Whatever Guru utters is a supreme hymn and the deeds inspired by him are the supreme deeds. So, the śaiva-devotee should accept Guru as God himself, have faith and serve him with thought, speech and action (60).

Origination of Knowledge and Yoga from Devotion

The knowledge and yoga are originated and firmly established by the practice of devotion. Yoga originates from knowledge and one ultimately attains liberation by accomplishing both knowledge and yoga (61). Knowledge can hardly be originated without devotion. Such

त्यक्त्वा भक्तिमयीं नावमुत्तर्तुममरापगाम् ।
पारादिवेषन्[२९] बाहुभ्यामतरिभ्यां महाल्पधीः ।।६३।।

विशेषमत्र वक्ष्यामि शृणु देवि समाहिता ।
कर्मभक्तिचिदात्मानस्त्वधिकारास्त्रय स्फुटाः[३०] ।।६४।।

आलम्बः कामिनः कर्म ज्ञानं निष्कासिनः[३१] परम् ।
विरक्तस्य त्वशक्तस्य भक्तियोगः शिवे मयि ।।६५।।

नेहोतोत्तरसम्भोगमादिप्राप्तेन सज्जते ।
भुञ्जन् प्रारब्धतः [३२]प्राप्तान् मयि भक्तो भवेद्ध्रुवम् ।।६६।।

[३३]सुसुखं ज्ञानमुत्पन्नं भक्तस्य सुदृढं भवेत् ।
निरस्ताज्ञानतिमिरस्तेन मुक्तो न संशयः ।।६७।।

न किञ्चिज्ज्ञानिनः कर्म निषेधो विधिरेव वा ।
विधिर्यो ज्ञाननिष्ठोऽभूत् स च निस्सङ्गितात्मनः ।।६८।।

---

knowledge is always disastrous and destructive, as nothing is gained after wasting efforts in pounding the straws (62). One who aspires to cross the river without the help of the boat of devotion, rather only by the strength of his own hands, should be considered a moron (63). O Goddess ! please listen attentively. I want to preach you here a special teaching. Action, devotion and knowledge have clearly been described as three rights in the scriptures (64). O Śive ! one who is attached to the world should take the help of the means of actions, for the nonattached desireless person knowledge is supreme and the ranunciated but incapable person should take help of my devotion (65). If a person enjoys the results of the deeds performed in the previous births with non-attached attitude, desirelessly, is sure to develop intense devotion for me (66). For such devotee, knowledge is easily attained and the devotion is firmly established. In this way, the darkness of ignorance is dissipated by the dawn of knowledge and thus, he is sure to be liberated (67). For the wise, affirmative and negative injunctions are not applicable. For him, firm determination for knowledge is supreme, by which only he achieves renunciation (68). Devotee should make all

भक्तस्य तु यथाशक्ति निषिद्धं यत्नतस्त्यजेत् ।
कुर्याद् विधेयं प्राबल्ये भक्तिमेवाश्रयेत् सुखी ।।६९।।

अन्यथा करणे कार्यं प्राश्चित्तं तु कामिनः ।
ज्ञानी ज्ञानेन सद्भक्त्या भक्तश्च मयि शुद्धये ।।७०।।

न कर्माधीनता बन्धो भक्तस्य ज्ञानिनो मम ।
न विरक्तिर्न चासक्तिः प्रायः श्रेयो भवेत् प्रिये ।।७१।।

देवदानवगन्धर्वयक्षराक्षसमानुषाः ।
मद्भक्त्यैव तरन्त्युग्रं स्त्रीशूद्रपशुपक्षिणः ।।७२।।

न मृत्युर्न जरारोगभयक्लेशाश्च[३४] हि क्वचित् ।
भयं पीतामृतस्यैव भक्तस्य [३५]सुखमेधते ।।७३।।

तपस्विभ्योऽधिको ज्ञानी ज्ञानिभ्यश्च मतोऽधिकः ।
कर्मिभ्यश्चापि गिरिजे [३६]तन्मद्भक्तः सुखी भवेत् ।।७४।।

---

efforts to abandon the forbidden deeds and should always indulge in performing such deeds which have duly been approved (by the scriptures). Such persons always remain happy by taking refuge in devotion (69). The worldly persons should perform atonement for not abiding to the affirmative and negative injunctions. The wise and devotee are purified by the knowledge and devotion respectively (70). O dear ! my devotee and the wise persons are not bound by the law of deeds, as they are free from both the attachment and non-attachment and their lives are righteousness itself (71). Divinities, demons, Gandharvas, Yakṣas, Rākṣas, human beings, women, serving class, animals and birds–all get redemption from severe miseries with the help of devotion to me (72). The devotee of Śiva is not afraid of death, aging, disease, fear, pain etc., as he is intoxicated with the nector of devotion and the resultant bliss is ever increasing (73). O the daughter of the mountain ! the wise person is superior to the ascetics but my devotee is superior to the wise and the performer of rites and rituals. Thus my devotee ever remains happy[1] (74).

अभक्ता दुर्गतिं लभन्ते

दुर्वासनानुबन्धेन विषयत्यागकातराः ।
मन्मायामोहितधियः पुरुषाः पूर्वकर्मतः ।।७५।।

राजसा घोरसङ्कल्पाः कामुका ह्यहिमन्यवः ।
मोहधूमान्धचक्षुष्काः [३७]स्वर्लोकं न विदन्ति ते ।।७६।।

नैव ते मां विजानन्ति हृदिस्थं य [३८]इमं यतः[३९] ।
अक्षशस्त्रा ह्यसुतृप्ता यथा नीहारचक्षुषः ।।७७।।

अहिता आतुरा वाचा परं पुष्पितयाखिलाः ।
बध्यन्ते सङ्कटे घोरे मांसलुब्धा इवाण्डजाः ।।७८।।

न रुचिः कर्म[४०] बन्धानां ज्ञानभक्त्योर्मम प्रिये ।
[४१]चर्माम्भस्तृप्तकुक्षीनां शुनामिव घृतं शुभम् ।।७९।।

अनुपास्य गुरुं भक्त्या त्वनभ्यस्यागमं त्वपि ।
अभक्ताज्ञानिनः श्रेयः कुत ईयुः परं मम ।।८०।।

Non-devotee Suffers

Some persons are reluctant to abandon the objects of enjoyment because of being fettered with the evil propensities caused by the deeds of their previous lives, as their intellect remains deluded with the mystic power of mine (māyā) (75). Such persons are the possessor of the nature of Rajaguṇa, having harsh determination, lascivious, charged with anger like snake and are unable to realise their own welfare and of others, as their eyes remain enveloped with the smoke of delusion (76). They fail to recognise me as an indweller in their heart because they only rely on their own eyes, satiate their ownselves like the eyes covered with the mist (77). Persons who are malicious, impatient, verbose, exaggerator remain in trouble as greedy bird seeking flesh is entrapped (78). O dear ! persons fettered by the previous deeds have no inclination for my devotion and knowledge, as the dog interested in chewing the bones and skins has no taste for pious butter-milk (79). How can a person without devoutedly serving Guru, practising the injunctions of the Āgama scriptures and being ignorant and devoid of devotion, be able to attain the auspicious highest state of mine (80).

भक्तिः सुसाधनं साध्यं ज्ञानं योगाद्विमुक्तये ।
तत्सिद्धस्य वृथा कर्म नीरोगिण इवौषधिम् ।।८१।।

देव्युवाच

न कर्म साधनं मुक्तेरभक्तिर्ज्ञानमप्युत ।
एवं यदि मते भेदास्तव शम्भो कथं वद ।।८२।।

अभक्तलिङ्गधारणान्मुक्तिर्भवति वा ?

प्राबल्येन विभोर्भक्तिः साध्यते मुक्तिरीश्वर ।
लिङ्गधारणतः किं स्यादभक्तस्योक्तभक्तितः ।।८३।।

इदं निरूपय विभो करुणाकर शङ्कर ।
मम बन्धो दयासिन्धो गन्धेभाजिनभूषण ।।८४।।

ईश्वर उवाच

सत्यमुक्तं त्वया देवि शृण्वत्र परमं वचः ।
मतभेदेषु [४२]चोक्तेषु विशेषं लिङ्गधारणम् ।।८५।।

Devotion is the supreme means to achieve the knowledge and then one can attain liberation by practising yoga. After attaining the state of liberation, the actions become fruitless as the medicines are non-essential for the person who has recovered from the ailment (81).

Goddess enquires —

O Śambhu ! if good deeds are not the means of liberation and knowledge is meaningless without devotion, then how the various doctrines have arisen in your religion, kindly explain (82).

Is liberation Possible for a Non-devoted Liṅgī?

O God ! if liberation is attained by intense devotion, then what will be the fate of the liṅgī who is devoid of devotion? (83) O the all pervasive, merciful Śaṅkara ! my companion, the ocean of compassion, adorned with the skin of the sweet odoured intoxicated elephant, kindly explain (84).

God replies —

O Goddess ! you have uttered the truth. Please listen to the final truth. Despite of the differences of opinions, wearing of Liṅga is specially common among all (85).

लिङ्गधारणतः संसृतिसागरं तरति

कर्मादिकारिणः कामं कामिनः कमलानने ।
कर्मबन्धविमोक्षाय कल्पितो मार्ग ईदृशः ।।८६।।

लिङ्गधारणसन्नावी तरेत् संसृतिसागरम् ।
तत्केन जीयते देवि गहना कर्मणो गतिः ।।८७।।

मतभेदाः सोपानमार्गाः

न त्यक्तुं शक्यते यावदेकदैव तनूभृता ।
तत्सोपानप्रसिद्ध्यर्थं मतभेदा निरूपिताः ।।८८।।

निर्विघ्नेन फलप्राप्त्यै लाभदार्ढ्यादिसिद्धये ।
निर्विघ्नाय विशोकाय कर्तव्यं लिङ्गधारणम् ।।८९।।

पूजार्चनादिको भेदश्चोदयायैव शाङ्करि ।
भक्तेर्ज्ञानस्य दार्ढ्याय केवलं त्वाप्तये स्फुटम् ।।९०।।

Liṅgī Crosses the Ocean of the World

O the lotus eyed ! performer of the rites and rituals may observe them for their own satisfaction but for the cessation of the bondage of karma, this (wearing Iṣṭaliṅga) is the only means (86). Wearing of Liṅga is like a strong boat by the help of which one goes beyond the ocean of the world. O Goddess ! who is able to know the karma whose nature is mysterious (87).

Hierarchy of Various Doctrines

It is impossible for a mortal being to abandon entirely and immediately all the karmas. They should be discarded gradually one by one. Thus arose the differences in doctrines (88). For the fruition of the deeds without impediments, for the steadiness of the benefits thus derived for the accomplishment of the work without hindrance and for the avoidance of sufferings, one should wear the Iṣṭaliṅga (89). O Śāṅkarī ! various kinds of worships and prayers are meant for the well-being of the people. They are also for the steadiness of the knowledge and devotion and for the attainment of the liberation (90). O Goddess !

परिज्ञानं गुरोः शास्त्रात् स्वरूपस्य ममापि च ।
पुरुषार्थः परो देवि बन्धनायाखिलं परम् ।।९१।।
आब्रह्मकीटपर्यन्तं भूतजातं मयीक्षयेत् ।
ममात्मनि द्वित्रितयमेकं चाखण्डमव्ययम् ।।९२।।

परं गुह्यं ज्ञानं तदङ्गानि च

एतज्ज्ञानं परं गुह्यमन्यदज्ञानमेव तत् ।
एतदङ्गानि सर्वाणि गुरुशास्त्रमुखानि[४३] हि ।।९३।।
विविक्तदेशः सन्तोषस्तृप्तिराचार्यसेवनम् ।
अनीहाचारमौनानि स्वाध्यायस्तप आर्जवम् ।।९४।।
अहिंसास्तेयसत्यानि दयात्मसमताखिले ।
तितिक्षा चाप्रमादश्च ब्रह्मचर्यव्रतं[४४] प्रियम्[४५] ।।९५।।
असन्नीताखिलापेक्षा ह्रीरहंमतिवर्जनम् ।
[४६]जातिक्रमविभेदाश्च सुखत्यागोऽन्यसम्मतम् ।।९६।।

---

receiving knowledge from the sacred mouth of Guru, by the study of the scriptures about the nature of one's own self and the knowledge of my nature are considered to be the supreme aim of life. Rest are the causes of bondage (91). All beings right from the Brahmā to the insects should be perceived as inherent in me. One should see everything that is counted in number as indivisible and as an immutable substance in me (92).

Most Secret Knowledge and its Aspects

This knowledge is supreme and secret, rest is ignorance. Whatever we learn from the mouth of divine Guru or scriptures are the aspects of this knowledge only (93). Living in a lonely place, contentment, satisfaction, service of Śri Guru, abandoning all desires, observing virtuous conduct and vow of silence, study, penance, modesty, non-violence, non-covetousness, truthfulness, compassion, perceiving equality with all beings, perseverence, carefulness, celibacy, being lovable, non-attached to impermanent things, shyness, abandoning ego-centricity, not accepting various castes and creeds, sacrificing enjoyment, honouring others' opinions, remaining satisfied with whatever re-

यदृच्छालाभविजयस्त्वनपेक्षापि हस्तगे ।
स्मृतिरीश्वर[४७]चिन्ता च तुष्टिः परहितक्रिया ।।९७।।

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
सुखदुःखात्मसमता परेषां च द्विषामपि ।।९८।।

साक्ष्यवस्थात्रये चापि परोपकृतिचेतनम् ।
[४८]आत्महितार्थनिर्बन्धः प्रतीकारानपेक्षिता ।।९९।।

गुरुशास्त्रेशसद्भक्तिरादरो भक्तभक्तिषु ।
ध्यानं ममाभिधानानामनुस्मरणमन्वहम् ।।१००।।

तेजस्वितापि वाग्मित्वमप्रागल्भ्यप्रदर्शनम् ।
असङ्ग आत्मचिन्तानां शिश्नोदरतृषां[४९] क्वचित् ।।१०१।।

अहेरिव गुणाद् भीतिः सङ्गमान्मरणादिव ।
कुणपादिव योषिद्भ्यो धैर्यं पुत्रिषु तेष्वपि ।।१०२।।

साङ्गस्यैवात्र सम्पूर्तिर्निरङ्गस्याङ्गिता कुतः ।
सह प्लवगते भीमे प्रवाहे भववारिधेः ।।१०३।।

---

ceived, feeling disinterested in things received, remembering and thinking about God, having contentment, making efforts for other's well-being (94-97), having detachment and indifference for son, wife, house etc., having equal disposition for pleasure and pain and with friend and enemies (98); keeping altruistic attitude in waking, dreaming, sleeping state and remaining indifferent for his own welfare and not being revengeful to anybody (99); maintaining devotion for Guru, scriptures and God, showing reverence for devotion and devoted person, meditating on me and constantly remembering the name of Śiva (100); having acumen and enthusiasm, not keeping company of self-centred, sensuous persons (101) ; keeping distance from evil like snake, remaining sacred of the company of evil doers like death and avoiding women like a dead body, having patience with house holders (102), Considering that which is appropriate may be fulfilled but inappropriate can never be fulfilled; cultivation of these qualities is helpful for crossing the horrible ocean of the world (102-103).

शिवे मन:स्थैर्यमेव परमो योग:

सर्वथा शृणु विश्वेशि परमार्थविनिर्णयम् ।
सर्वयत्नेन मनसा[५०] स्थिरीकुर्यान्मनो मयि ।।१०४।।

एष वै परमो योगो मनसः सङ्ग्रहः शिवे ।
दम्यस्यैवार्ततो यत्नादुपलब्ध्या मनोज्ञया ।।१०५।।

जगन्मिथ्येति बुद्ध्वा शिवो भवति

एतन्निरूपितं देवि गुणत्रयविकारकम् ।
जगन्मिथ्यामयं बुद्ध्वामामाश्रित्य भवेदहम्[५१] ।।१०६।।

इति श्रीपारमेश्वरतन्त्रे [५२]श्रीवीरशैवदीक्षाप्रकरणे
शिवाद्वैत- सिद्धान्ते द्वाविंशतितमः
पटलः समाप्तः[५३] ।।२२।।

Perfect Concentration on Śiva is Supreme Yoga

O the Goddess of the universe ! now, please listen to my views regarding the ultimate aim. Devotee should make all efforts to purify his mind and keep it fully concentrated on me (104). O Śive ! this complete concentration and control of mind is called the Supreme yoga. As the farmer secures desired result in agriculture keeping control on his bull, in the same way, the devotee attains the desirable spiritual results after controlling his mind (105).

Knowing World as False, One Becomes Śiva

O Goddess ! knowing that this world, made of the three attributes, is false, the devotee should take refuge in me for attaining me (106).

Here ends the twenty second chapter of Pārameśvaratantra propounding the doctrine of Śaiva non-dualism while describing the procedure of Dīkṣā in Vīraśaiva religion ll 22 ll

Notes and References (in Sanskrit Text)

१. ख्यं धर्म–क.।
२. स्तीर्थे–ग. घ.।
३. राप्तो हि–क.।
४. द्वारा–क.।
५. भक्तेनाका–ख. ग. घ.।
६. 'वस्त्रपूतं' न दृश्यते–क.।
७. ष्ठानस–क. ख.।
८. पङ्क्तिद्वयं न दृश्यते–ग. घ.।
९. भाजानां–ख. ङ.।
१०. स्येन–कटि., ग. घ.।
११. न रक्तो–क.।
१२. धियस्ते–कटि.।
१३. वन्दे–कटि.।
१४. धारणम्–घ.।
१५. सिद्धौ भक्तिर्मतीशि सा–क. ख.।
१६. सात्–क.।
१७. यथा–क. ख.।
१८. निधि–ग. घ. ङ.।
१९. सा प्रीति.....णा–ग. घ. ङ.।
२०. स्यौषधं यथा–ख. ग. घ.।
२१. स्त्वभय–कटि.।
२२. श्रित्याभ–क. ख.।
२३. दाकृ–ख. ग. घ.।
२४. पङ्क्तिरेषा नास्ति–ग. घ.।
२५. भक्त्या–ग. घ.।
२६. परामपि–ग. घ.।
२७. स्पृही–घ. ङ.।
२८. मुत्तमम्–क.।

२९. वेच्छन्–ख.।
३०. स्मृताः–क.।
३१. निष्ठावतः–क.।
३२.प्राप्तं मयि–ख.।
३३. ससुखं–घ.।
३४. आधिः क्लेशोऽपि न–ख. ग. घ.।
३५. मुद–ख.।
३६. तन्मे भक्तः–ग. घ.।
३७. स्वं–ख.।
३८. इदं–घ. ङ.।
३९. यथा–ग. घ.।
४०. बद्धा–कटि. ख.।
४१. चर्माम्भाः–क., चर्मास्थि–कटि.।
४२. शक्तौ च–ग. घ.।
४३. स्त्रादिकानि–ख. ग. घ.।
४४. मृतं–क. ख.।
४५. प्रिये–ग. घ.।
४६. जातिक्रमविभिन्नेच्छा–कटि., जात्या–घ. ङ.।
४७. श्वरि मच्चिन्ता–कटि.।
४८. आत्मा–क. ख.।
४९. नृणां–क.।
५०. विमलं–कटि. ख.।
५१. भवेत् सुखी–कटि. ख.।
५२. 'श्रीवीर.....सिद्धान्ते' नास्ति–ख. ग. घ.।
५३. 'समाप्तः' नास्ति–क. ख.।

Notes & References (in English Text)

1. See *Bhagavadgītā,* 6.46.

❋ ❋ ❋

त्रयोविंशः पटलः

देव्युवाच

त्रिलोचनाखिलाधार श्रीकण्ठ परमेश्वर ।
त्रिनाभि त्रिगुणालोक त्रितत्त्वपरिवर्तक ।।१।।

गुरुः प्रियोऽसि भर्ता मे दत्तदेहा त्वयाऽस्म्यहम् ।
वदात्र विस्तरादीश पृष्टं मत्प्रश्नगर्भितम् ।।२।।

निर्लेपस्य जगदाधारता कथमिति प्रश्नः

निर्लेपानङ्गसूक्ष्मस्य जगदाधारता विभो ।
स्थूलस्याप्यविकारस्य कार्यकारणता कथम् ।।३।।

सङ्गादसङ्गिनः सङ्गिजीवदृश्यविकारिणः ।
समापद्येत तादात्म्यमनित्यत्वादिलक्षणम् ।।४।।

Chapter - 23

Goddess enquires —

O the three eyed, substratum of the universe, having three navel (representing gross, subtle and transcendental aspects), manifestor of the three sattva, rajas and tamas attributes, bearer of the nature of three categories (pati, paśu and pāśa), O Śrikaṇṭha, the supreme Lord ! you are my preceptor and dear Lord. This body has been offered to me by you. O God ! kindly explain, in detail, the grave queries put by me (1-2).

How the Formless Becomes Substratum of the Universe

O the all pervasive ! being formless, without body, subtle, how do you become the substratum of the universe? Your gross body is also immutable. How can there be a causal relationship of you with the universe? (3) All the beings and non-beings of the world are subject to mutation and attachment. You would be also affected by their transitoriness and other limitations owing to the close contact and

सङ्गिनोऽसङ्गिनः स्थातुमुपपद्येत् स्थितिः कथम् ।
परिपूर्णाप्तकामस्य वचसापि प्रयोजिता ।।५।।

ईश्वर उवाच

सम्यगापृच्छि भगवत्यतिगुह्यमिदं त्वया ।
यदि ज्ञेयं त्यजेत् सङ्गमात्मन्यात्मनात्मना ।।६।।

अनन्तोऽहमनाधार आधारो जगतामहम् ।
असङ्गश्चापि निर्लेपस्तथा त्वं शृणु पार्वति ।।७।।

आकाशवायुदृष्टान्तेन तदुपपादनम्

अस्पृशन्नेव भूतानि धारयाम्यखिलान्यपि ।
गन्धवाहमिवाकाश एवमाधारता मम ।।८।।

वस्तुतः सर्वबीजस्य पूर्णस्याप्यविकारिणः ।
वदतो विधिमात्रेण प्रयोज्यत्वं कुतो मम ।।९।।

गिराविव तृणादीनि जायन्ते यान्ति वै लयम् ।
मेघागतिरिवार्कस्य तत्सम्बन्धं कुतो गिरेः ।।१०।।

---

identification with them (4). How can a detached self-contented God remain associated with a self who is fully attached with the world? How can it be consistently expressed in language? (5)

God replies —

O the Goddess ! you have very properly asked an apt and secret question. If one intends to know the truth, he has to abandon the attachment for his own self (6). O Pārvatī ! I am the infinite substratum of the universe despite of being non-attached and formless, please listen (7).

Causality Explained by the Example of Space and Air

I support all beings and the whole universe without touching them as the space bears the air. In this way, I am the basis of everything (8). In fact, I am the matrix of all, even if being perfect and immutable. How can the principle of causation be imposed on me as per scriptures? (9) The grass etc. grow on the hills and die. This function is carried out by the movements of the clouds, rains and the sun. How are they related to the mountain? (10) Possessiveness, agency, causality etc. are all the

अधिष्ठातृत्वकर्तृत्वकारणत्वादिकान्यपि ।
कल्पितानि महाशक्त्या भवत्यैव मदीयया ।।११।।

देव्युवाच

कार्यसद्भावे शिवस्याद्वयता कथमुपपद्यते?

अनाधार सदाधार धातरीश्वर वल्लभ ।
निरन्तर निरातङ्क परिपूर्णाद्वय प्रभो ।।१२।।

नित्यसत्यसुखज्योतिःकेवलस्य चिदात्मनः ।
सद्भावेऽन्यस्य कार्यस्याद्वितीयत्वं कुतस्तव ।।१३।।

उक्तानि लक्षणान्येतान्यखिलानि स्युरीश्वर ।
तथापि त्वयि विश्वेश छिन्ध्येतत् संशयं मम ।।१४।।

ईश्वर उवाच

मृत्तिकेत्येव सत्यमिति उपनिषद्वचनेन तत्समाधानम्

घटाद्या मृत्समुपन्ना मृदेव व्यवहारतः ।
नामरूपक्रियावत्त्वं कनकात् कुण्डलादिवत् ।।१५।।

कार्यस्य कारणात्मत्वं लोकसिद्धमपि श्रुतिः ।
मृत्तिकेत्येव सत्यं चेत्याह बीजाङ्कुरं स्फुटम् ।।१६।।

---

assumption of Mahāśakti, the supreme power which is you yourself (11).

Goddess enquires —

How is Non-duality of Śiva Established?

O Lord ! you are the substratum, baseless and the sustainer, perpetuator, fearless, perfect and non-dual (12). You are eternal truth, bliss, effulgent and of the nature of pure consciousness. If there is any other entity, then, how is your non-duality possible? (13). O the God of the universe ! if all traits are existent in you, then, how are you the sole lord of the universe? Kindly remove my doubts (14).

God replies —

Earthen Pots are Only Earth—Upaniṣads Preach

Earth is the material cause of pot etc., and despite of various names, forms and functions, they are considered as earthen only like an ear ring made of gold (15). It is commonly said that the effect is fully inherent in cause which also is supported by the scripture as 'Mṛttiketyeva

व्यवहर्ता व्यवहृतिर्व्यवहार्यमिदं त्रयम् ।
एक एवासमिह यत् सुवर्णत्वं हि काञ्चनम् ।।१७।।

यावन्नात्मपरिज्ञानं शिश्नोदरकुवादिनाम् ।
तावद् भेदवदाभासो ज्ञाते मयि कुतो भिदा ।।१८।।

रज्जौ सर्पत्वमारोप्य स्वभ्रान्त्या कुमना अहिः ।
बिभेति किं वा तस्येयं करोति न करोति वा ।।१९।।

संस्थिते मय्यधिष्ठाने निस्तरङ्गसुखाम्बुधौ ।
सञ्जायन्ते विलीयन्ते नामरूपात्मबुद्बुदाः ।।२०।।

देव्युवाच

प्रकृतेः परतन्त्राया यद्वा स्वातन्त्र्यवर्त्मनः ।
जात्याधृतिरियं नेष्टा भवतोऽस्ति प्रयोजनम् ।।२१।।

[1]*इति श्रीपारमेश्वरतन्त्रे त्रयोविंशतिपटलः समाप्तः ।।२३।।*

---

satyam' and explained by the example of seed and its sprouting (16). Enjoyer, enjoyment and the object of enjoyment are all the same as the gold and the ornaments made therefrom. The brightness of gold remains ever existent in the ornaments (17).

People remain engaged in sensuous and lascivious activities before the dawn of self-knowledge. Till then, the discursive delusions remain. How can that exit on the onset of my knowledge? (18). The person imposing the serpent on the rope and assuming it to be a real serpent in delusion, is so much scared that he is unable to decide as what to do or not to do (19). Śiva is the substratum – the waveless ocean of bliss. This universe of names and forms emerges and submerges into this ocean of bliss (20).

Goddess states —

The nature which is dependent and even if it is considered to be independent, then also this creation which is based on the cycle of births and deaths cannot be created by her alone. So, your presence is inevitable (21).

Here ends the twenty third chapter of Pārameśvaratantra ||23||

❋ ❋ ❋

Notes and References (in Sanskrit Text)

१. ङ. पुस्तके पुष्पिकावाक्यं नास्ति।

APPENDICES

INDEX OF HALF VERSE

BIBLIOGRAPHY

VARIANTS

INDEX

श्लोकार्धानुक्रमणी

अकरक्षालनं भुक्त्वा	९.४३	अजानन्नीतिबोधाय	१६.६६
अकिञ्चनत्वं निर्बाधो	१६.८०	अजिह्वा ये रसास्वादे	८.११
अकिञ्चनस्य दान्तस्य	२२.१५	अजिनं व्याधिपीडायै	१३.१५
अकीटक्रिमिदष्टानि	७.७२	अजिनं कम्बलं वासः	१३.१३
अक्षय्यफलदः सर्व	१९.४७	अजो नित्यः शाश्वतो	२१.५६
अक्षरास्त्रा ह्यसुतृप्ता	२२.७७	अज्ञात्वा मन्मते सारं	१५.१८
अक्षैस्तु पञ्चदशभि	११.९७	अज्ञात्वैतन्महाशास्त्र	१६.६३
अखण्डमाद्यं यल्लिङ्गं	१४.७	अज्ञेन देहतादात्म्या	२१.५५
अखण्डसच्चिदानन्दं	९.९५	अणिमाद्यखिला भोग	२०.७४
अगर्भं वा सगर्भं वा	११.९१	अणुमात्रमपीशानि	३.९१
अगोचरः श्वकाकानां	१८.९३	अत ऊर्ध्वगतिभ्रष्ट	१६.७१
अग्नितत्त्वमिदं देवि	६.१९	अत ऊर्मिवदूर्मित्वं	६.७०
अग्निमन्त्रद्वयेनाथ	८.३८	अत एव महादेवि	१.१०७
अग्निमूर्ध्नाऽग्नये चेति	४.८६	अतिक्रम्य गुरुं यस्तु	२.१०३
अग्निरित्यादिकैर्मन्त्रैः	१७.५२	अतिनिन्दितकर्माणं	२२.९
अग्निवद् धातुवद् देवि	२१.५३	अतिप्राणिविहिंस्रं वा	२२.९
अग्नीशासुरवातेषु	१३.२४	अतिमानुषसम्पत्ता	२२.४०
अग्नेरुत्तरदिग्भागे	४.६६	अतिरस्कारिणो न्यूने	८.१९
अग्रन्थित्रृजुरूपः	२.५०	अतिसूक्ष्मं महार्थं च	११.१०
अग्रामावेशनं शक्त्या	१६.८२	अतीतत्र्यष्टतत्त्वाय	६.१०२
अघोरेणाथ लिङ्गस्य	३.२७	अतो महारहस्यं हि	१.१०३
अङ्गलोपे भवेद् व्यङ्गी	१०.७३	अतो विचार्य यत्नेन	१५.८३
अङ्गुलीरङ्गजहते	३.३७	अत्यन्तमलिने देहे	१७.४०
अङ्गुल्या जपसंख्याना	११.९३	अत्र पश्य महादेवि	१९.११
अङ्गुष्ठं मोक्षदं विन्द्यात्	११.९८	अत्र वक्ष्यामि ते देवि	१८.१०९
अङ्गुष्ठमध्ये गोकर्णं	१३.७६	अत्र वक्ष्ये विशेषं ते	१.८६
अङ्गुष्ठमूलेऽयोध्या	१३.७४	अत्रादौ वीरशैवाख्यं	१.३२
अङ्गुष्ठरहितं जप्यं	११.१००	अत्राहो खलु ते नास्ति	१९.१६
अङ्गुष्ठादिकनिष्ठान्तं	१३.२०	अत्रैव तनु विश्वात्मन्	२१.७७
अङ्गुष्ठेन जपं जप्यं	११.९९	अत्रोच्यते मया योऽर्थः	१५.३३
अङ्गुष्ठे भावयेद् रुद्रं	७.४८	अथ काम्यानि कर्माणि	५.६८
अङ्गोपाङ्गात्मभावेन	६.६३	अथ कुण्डस्य परितो	४.४३
अचिरादेव विज्ञानं	१२.५	अथ कुर्यान्महादेवि	२.२२
अजागरूकश्चास्वप्नो	८.८०	अथ चेत्सज्जिकानाश	२.९८

अथ चेद्वारुणं कर्तु	१७.४२	अथोच्यते बहिःपीठं	१३.१०
अथ तद्दक्षिणे भागे	३.२४	अथोपदेशं कुर्वीत	५.२७
अथ तद्वाहनार्थाय	१८.२७	अद्य त्वयोद्धृताः सर्वे	१५.१७
अथ ध्यायेत भवती	४.२०	अद्वेष्टारोऽधिके स्वस्मात्	८.१९
अथ नीरक्तचित्ता ये	१२.११	अधःशायी ब्रह्मचारी	१३.६४
अथ भक्तो गुरुं देवि	५.२५	अधमं ब्रह्मदैवत्यं	११.८५
अथ यत्नेन कुण्डस्थं	४.२४	अधमं वाचिकं प्राहु	११.८४
अथ यश्चरमन्येषा	१६.१३	अधिकारानुसारेण	१४.११
अथ ये मानवा लोके	१२.३४	अधिकारो न चान्येषा	१२.९४
अथ वक्ष्यामि गिरिजे	१७.२९	अधिष्ठातृत्वकर्तृत्व	२३.११
अथ वक्ष्ये गिरिसुते	१.१५	अधीत्य वेदान् वेदान्तं	९.५०
अथ वक्ष्ये महाशैवं	७.१९	अधैर्यस्तम्भिता नौका	९.७७
अथ वक्ष्येऽधिकाराय	१५.४२	अध्यापनं चाध्ययनं	१२.३
अथ वक्ष्ये विशेषं ते	६.४०	अध्यासः कथमीशान	२१.७७
अथवा त्रीणि कुर्वीत	१४.४०	अनन्तगुणितं पाणि	१३.६७
अथवाऽनन्तरं भानो	८.८८	अनन्तबाहवे बाहून्	२.३६
अथवा यद्यथाशक्ति	१८.९५	अनन्तमव्ययं शुद्धं	२१.४६
अथ वैदिकमीशानि	१.१०	अनन्तशक्तिरिति मे	६.६२
अथ शिष्यो गुरुं भक्त्या	५.३२	अनन्तशक्तिश्च विभो	६.३३
अथ शृणु महादेवि	५.१	अनन्तसागरारूढ	९.९८
अथ शृणु महादेवि	१५.२८	अनन्तोऽहमनाधार	२३.७
अथ षट्कोणकोणेषु	१०.४८	अनन्यपीडनं पुष्पं	१०.६२
अथ षोडशपत्रेषु	१०.४५	अनपेक्षः स्वतः प्राप्ते	९.१५
अथ संपूज्य विधिवत्	३.२०	अनर्थलोभमर्थाढ्यं	२.७४
अथ संप्रार्थयेदग्निं	४.५४	अनर्थातुरमात्मज्ञ	२.६५
अथ स्रुचाऽऽज्यमाचार्य	४.४८	अनल्पान्यपि चाल्पानि	१४.७९
अथ स्रुचा समारभ्य	४.७७	अनश्नन् तत्परो भूत्वा	११.७७
अथ हुत्वाऽष्टदिक्पालान्	४.८२	अनाचारोऽपि वाचार	२२.५
अथाग्निमर्चयेत् पश्चाद्	४.६४	अनाथं रोगिणं दीनं	५.८९
अथाधिकारी गच्छेत	१५.५४	अनाथानां तु संस्कारे	१९.८५
अथान्नप्राशनार्थं च	४.३३	अनादरं तथाऽऽलस्यं	९.२८
अथारुरुक्षोरीशानि	१३.९	अनादिनिधनानन्त	१६.२
अथार्चयेत् सभां देवि	५.३३	अनादिबोधो या बुद्धि	६.६१
अथैषां को नु वाचारो	१५.१२	अनादिमादिमन्यस्या	२१.२०

अनादिशैवः प्रथम	१.२५
अनादिशैवनिष्ठस्य	७.३४
अनादिशैवनिष्ठस्य	१०.२
अनादिशैवनिष्ठस्य	२०.८९
अनादिशैवभेदस्य	७.४
अनादिशैवमारभ्य	१६.६४
अनाद्यविद्यायुक्तस्य	२१.६५
अनाद्यादिषु भेदेषु	९.२२
अनाधार सदाधार	२३.१२
अनायासतपश्चर्य	७.९४
अनायासेन संपाद्य	७.८१
अनायासेन सुसुखं	१.७०
अनायासेनातिशयं	१.१०१
अनालक्षितलोको यः	८.७९
अनावृतस्यानन्तस्या	२१.६७
अनावृतस्यापारस्य	२१.६४
अनावृताय भो शम्भो	१६.१
अनावृतोऽस्म्यनन्तोऽस्मि	२१.७१
अनीहाचारमौनानि	२२.९४
अनुगच्छेज्जनो यावत्	१८.१०३
अनुत्थानं महादेवि	१३.९०
अनुदेहं नियन्त्येते	२२.४१
अनुपास्य गुरुं भक्त्या	२२.८०
अनुलिप्य सुधायुक्त	३.१०
अनुशैवं महाशैवं	१.१६
अनुशैवमतस्थश्च	१०.५
अनुशैवमतस्थस्य	७.३५
अनुशैवादिभेदानां	२०.५
अनुशैवादिभेदानां	२०.१७
अनुष्ठानसमर्थस्य	२२.२२
अनुष्ठायार्हतादीनि	९.४९
अनुष्ठिता अपि तथा	१४.८३
अनूतनान्यपूर्वाणि	७.७२
अनेकजन्मसंसिद्ध	८.८७
अनेन स्तवराजेन	६.१०६
अन्तरे द्वादशादित्यान्	१३.२५
अन्तर्गतपवित्राय	४.७५
अन्तर्गतमहावह्निं	४.२१
अन्तर्यागो बहिर्यागः	१२.४
अन्त्यजो वाऽधमो वापि	११.२६
अन्त्येष्टेर्मोक्षदीपाख्यं	१९.१११
अन्धा ये लिङ्गिनो देवि	८.९
अन्धेन नीयमानोऽन्धो	७.९२
अन्नाद्यैरर्चयेद् भक्त्या	५.५८
अन्नानां पतये तुभ्य	३.५४
अन्नेन नवनीतेन	५.५६
अन्यः सन्त्यज्य नरके	१६.६५
अन्यत्र कर्मबाहुल्या	१.६८
अन्नानां पतये तुभ्य	३.५४
अन्नेन नवनीतेन	५.५६
अन्यत्र नास्ति मल्लिङ्ग	१.७१
अन्यथा करणे कार्यं	२२.७०
अन्यथाप्युत्क्रमाद् गत्वा	२०.९१
अन्यथान्तर्गतो ध्यात	१५.९१
अन्यथा पतितो याति	१४.५४
अन्यथा भ्रंशते देवि	१५.५३
अन्यथा भ्रंशते भूयो	१५.६६
अन्यथा विपदं याति	१४.२६
अन्यथा व्रतभङ्गः स्याद्	१३.६०
अन्यथा स्वार्थविभ्रष्टो	१६.४६
अन्यदेवान् नमस्कृत्य	१७.१०
अन्यदैवान्धकूपेषु	१५.१८
अन्यद् वा शोभनं	१७.४९
अन्यलिङ्गेषु सर्वेषु	२.१८
अन्यश्चुलुकतोयेन	१३.८७
अन्यस्मै बोधयन्ति	१५.२६
अन्यस्य लक्षणं वक्ष्ये	१६.३८
अन्यांश्च बोधयेद् भक्त्या	१९.४६

अन्यात्मविदितं बाह्यं	१२.१४
अन्यानि गन्धपुष्पाणि	१८.१००
अन्यानि चादिशैवादि	१५.९
अन्ये च शिवभक्ता ये	१९.८८
अन्येन स्थापितान् वृक्षा	१९.४९
अन्वीक्षितात्मनो बन्धुं	२०.५९
अपक्वं न पिबेत्तोय	७.६१
अपक्वमतिपक्वं च	१७.४६
अपक्वमपि पक्वं वा	१६.५०
अपनीयाक्षिपेद् देवि	४.७४
अपरिग्रहशीला ये	८.१८
अपरैरश्रुतं किञ्चि	११.८७
अपाणिपादं जविनं	२१.२९
अपात्रबहुपात्राणि	१४.४१
अपि कैवल्यमीशानि	२२.४२
अपि गुह्यं तव प्रीत्यै	१६.१०४
अपि पापशतं कृत्वा	१.४४
अपि लौहेन पात्रेण	१३.४८
अपि हस्तगतं भोगं	२०.२८
अपूर्वदीक्षाकरणे	२.९४
अपूर्वापरकर्माङ्ग	९.४२
अपेक्ष्य कामिनीं कामी	२२.५३
अप्युत्कटेभ्यः कर्मभ्यो	२२.६
अप्येकरूपतां प्राप्य	२१.७९
अप्रतर्क्यमनिर्देश्य	९.९६
अप्रमत्तः सदा तिष्ठे	१४.३४
अप्रमत्तः स्मरेन्नित्यं	१४.८२
अप्रमत्तमुदाराङ्ग	२.७३
अबाधे विजने देशे	१७.३७
अबोधयित्वा शिष्यं	१६.६३
अभक्तस्य परं दुःख	२२.५०
अभक्तस्योदिता संवि	२२.६२
अभक्ता ज्ञानिनः श्रेयः	२२.८०
अभक्तेनाविवेकेना	९.७७
अभयङ्कर ईशानि	४.५२
अभावादधिकारस्य	९.६
अभावे पत्रपुष्पादे	१६.३३
अभावे याचयेदन्न	७.६३
अभावे राजतं ताम्रं	१४.४४
अभितः शिवकैवल्यं	१०.६६
अभिन्नं विपुलं श्लक्ष्णं	१४.३९
अभिन्नकान्तिमल्लिङ्गं	१६.३९
अभिमन्त्र्याथ मनुना	५.७०
अभिमन्त्र्यानुवाकैस्तैः	५.३
अभिवन्देत् तदान्योन्यं	५.४९
अभिषिच्य स्वलङ्कृत्य	११.७३
अभिषिञ्चेत् प्रयत्नेन	५.५५
अभिषिञ्चेद् यथाशक्ति	५.५५
अभिषिञ्चेद् यथाशक्ति	१३.४९
अभिषेकः प्रकर्तव्यो	३.७९
अभिषेकपरो नित्य	१३.७१
अभिषेकादिकं याव	५.५४
अभिषेकाय लिङ्गस्य	१४.५१
अभिषेके च पूजायां	१३.३६
अभेदभावनाधीरं	२.७२
अभ्यङ्गमैच्छिकं देवि	१८.९०
अभ्यसेदासनं चादा	१०.२१
अभ्येत्य द्रावयेन्नित्यं	७.९७
अमङ्गलं न कर्तव्यं	१८.८६
अमलं भावनातीतं	२१.२६
अमानिनोऽदम्भिनश्चा	८.१२
अमाययाऽनपेक्षातः	२२.३६
अमूलमेकमव्यक्तं	२१.२२
अमृता मानदा पूषा	४.४९
अमृत्तिकादिनियम	९.४२
अयुतं पर्वते देवि	११.१०१
अरण्ये सन्ति पत्राणि	९.६७
अरिवत् प्रतिकूलत्वा	६.७२

अरुणा मालिनी शान्ता	४.४७
अरूपं सर्वरूपाढ्य	२१.२१
अर्कपुष्पं राजवश्यं	३.५०
अर्चन्निर्ऋतिदिग्वक्त्र	१४.६५
अर्चयन्ति पृथक् चैव	३.१७
अर्चयेज्जङ्गमं धन्यः	५.८७
अर्चयेदतिथीन् भक्त्या	९.८५
अर्चयेदम्बिकानाथं	१२.५५
अर्चयेदेककालं वा	७.१४
अर्चयेन्नित्यमीशानि	७.७७
अर्थार्थी लेलिहानाया	४.४०
अर्थिनः सन्ति ये भूमौ	१९.४२
अर्धचन्द्राकृतिर्बिन्दु	११.३७
अर्धार्धमन्तरे स्थाप्य	१४.१५
अर्धोदयादियोगेषु	३.७०
अर्धोदये त्वसंक्रान्ता	१९.५५
अर्हंश्चार्वाकबौद्धश्च	१.३०
अलङ्कुर्वीत तं देहं	१८.२५
अलक्षत्वं यथागारे	१६.८१
अलङ्कृतं सुवस्त्राद्यै	१८.२९
अलङ्कृत्याष्टभिर्दिक्षु	४.६६
अलब्धसम्यग्ज्ञानश्च	९.६
अलम्बुषा सिनीवाली	४.४८
अलाभे गृहिणो वापि	५.६४
अलाभे दन्तकाष्ठानां	१७.३८
अलिङ्गचिह्नितं पात्र	१६.३५
अलिङ्गिनोपनीतं यद्	१६.३५
अलिङ्गिनो यतेर्देवि	९.४५
अलिङ्गिभ्यो वरो लिङ्गी	५.१०३
अलिङ्गिस्पृष्टमन्नं तु	१७.२३
अलुप्तशक्तये नित्यं	६.८७
अलुप्तशक्तिरिति या	६.६२
अवज्ञानं कृतं तेषां	१२.४३
अवधूतश्च संन्यासी	१०.६७
अवर्जनीयोऽप्राप्यापि	९.८०
अवस्थात्रितयातीत	२१.२७
अविघ्नं विघ्नकर्तारं	१०.४१
अविद्यावशतः स्याच्चेद्	२१.६८
अविशोऽनामिकामध्ये	१३.७७
अविश्वासश्च सर्वत्र	१७.१४
अविषह्यानि दुःखानि	१५.८५
अशक्तः कामनात्यागे	२२.५७
अशक्तः पूजने भक्त	१४.८६
अशक्तः सर्वयत्नेन	३.८१
अशक्तः स्वयमन्येषां	१९.९४
अशक्त उत्थितो मध्ये	१३.६१
अशक्तश्चासहायश्च	८.६६
अशक्तस्तु यथाशक्ति	२२.१८
अशक्तानां च बालानां	१९.९७
अशक्तेभ्योऽपि लिङ्गिभ्यः	१९.५४
अशक्तो भक्तिसद्भावे	१९.४८
अशक्तोऽसहनो मूढो	९.७९
अशास्त्रे वाऽपि शास्त्रे वा	१४.७६
अशिष्टो वा विशिष्टो वा	५.१०२
अशुद्ध एव देवेशि	५.१०२
अशुद्धमपि तच्छुद्धं	१६.७९
अश्रोत्रमखिलश्रोत्रं	२१.२९
अश्वत्थविल्वामलक	१९.३९
अश्वत्थोदुम्बरप्लक्ष	३.११
अश्वमेधशताच्छ्रेष्ठं	१२.५०
अष्टकोटिमहाभेदं	१.१९
अष्टदिक्ष्वर्पयेदष्टौ	१८.८०
अष्टधा लक्षणं देवि	१७.८३
अष्टधा लक्षणं प्राहुः	१२.२५
अष्टबन्धेऽष्टबन्धः	१४.२७
अष्टबन्धे विशीर्णे तु	३.६१
अष्टभिः पञ्चभिर्द्वाभ्या	१३.४५
अष्टावरणसंयुक्ता	७.५५

अष्टोत्तरशतं चैव	४.४३
अष्टोत्तरशतं जप्त्वा	५.३०
असंत्यागः क्रियाणां च	१२.१०१
असक्तिरनभिष्वङ्गः	२२.९८
असङ्कटत्वाद् दुष्टानां	१२.२१
असङ्गः प्रतिबिम्बोऽस्मि	२१.५१
असङ्ग आत्मचिन्तानां	२२.१०१
असङ्गश्चापि निर्लेप	२३.७
असत्यवादरहित	२.७४
असन्त्यज्य तुरीयोऽपि	१६.६५
असन्नीताखिलापेक्षा	२२.९६
असमानतयाऽनर्हा	५.९८
असिताङ्गं रुरुं चण्डं	१०.४८
अस्ति चेदपि भेदो वा	१५.११
अस्ति चेदुपदेशं मे	१५.५
अस्ति चेद्भूतिविश्राण्य	२०.६५
अस्ति दिङ्मुखवैषम्यं	२१.७९
अस्तु तिष्ठ शिवाज्ञेति	२.७६
अस्नातो वापि शुद्धो वा	९.४८
अस्पृशन्नेव भूतानि	२३.८
अस्पृष्टविषयस्नेहो	६.४३
